श्री भुवनेश्वरी स्तोत्रं

श्री भुवनेश्वरी स्तोत्रं

अथानंदमयीं साक्षाच्छब्दब्रह्मस्वरूपिणीं |
ईडे सकलसंपत्त्यै जगत्कारणमंबिकां || 1 ||

आद्यामशेषजननीमरविंदयोने-
-र्विष्णोः शिवस्य च वपुः प्रतिपादयित्रीं |
सृष्टिस्थितिक्षयकरीं जगतां त्रयाणां
स्तुत्वा गिरं विमलयाप्यहमंबिके त्वां || 2 ||

पृथ्व्या जलेन शिखिना मरुतांबरेण
होत्रेंदुना दिनकरेण च मूर्तिभाजः |
देवस्य मन्मथरिपोरपि शक्तिमत्ता-
-हेतुस्त्वमेव खलु पर्वतराजपुत्रि || 3 ||

त्रिस्रोतसः सकलदेवसमर्चिताया
वैशिष्ट्यकारणमवैमि तदेव मातः |
त्वत्पादपंकजपरागपवित्रितासु
शंभोर्जटासु सततं परिवर्तनं यत् || 4 ||

आनंदयेत्कुमुदिनीमधिपः कलानां
नान्यामिनः कमलिनीमथ नेतरां वा |
एकत्र मोदनविधौ परमे क ईष्टे
त्वं तु प्रपंचमभिनंदयसि स्वदृष्ट्या || 5 ||

आद्याप्यशेषजगतां नवयौवनासि
शैलाधिराजतनयाप्यतिकोमलासि |
त्रय्याः प्रसूरपि तथा न समीक्षितासि
ध्येयासि गौरि मनसो न पथि स्थितासि || 6 ||

आसाद्य जन्म मनुजेषु चिराद्दुरापं
तत्रापि पाटवमवाप्य निजेंद्रियाणां |
नाभ्यर्चयंति जगतां जनयित्रि ये त्वां
निःश्रेणिकाग्रमधिरुह्य पुनः पतंति || 7 ||

कर्पूरचूर्णहिमवारिविलोडितेन
ये चंदनेन कुसुमैश्च सुजातगंधैः |
आराधयंति हि भवानि समुत्सुकास्त्वां
ते खल्वखंडभुवनाधिभुवः प्रथंते || 8 ||

आविश्य मध्यपदवीं प्रथमे सरोजे
सुप्ता हि राजसदृशी विरचय्यविश्वं |
विद्युल्लतावलयविभ्रममुद्वहंती
पद्मानि पंच विदलय्य समश्नुवाना || 9 ||

तन्निर्गतामृतरसैः परिषिक्तगात्र-
-मार्गेण तेन विलयं पुनरप्यवाप्ता |
येषां हृदि स्फुरसि जातु न ते भवेयु-
-र्मातर्महेश्वरकुटुंबिनि गर्भभाजः || 10 ||

आलंबिकुंडलभरामभिरामवक्त्रा-
-मापीवरस्तनतटीं तनुवृत्तमध्यां |
चिंताक्षसूत्रकलशालिखिताढ्यहस्ता-
-मावर्तयामि मनसा तव गौरि मूर्तिं || 11 ||

आस्थाय योगमविजित्य च वैरिषट्क-
-माबद्ध्यचेंद्रियगणं मनसि प्रसन्ने |
पाशांकुशाभयवराढ्यकरां सुवक्त्रा-
-मालोकयंति भुवनेश्वरि योगिनस्त्वां || 12 ||

उत्तप्तहाटकनिभा करिभिश्चतुर्भि-
-रावर्तितामृतघटैरभिषिच्यमाना |
हस्तद्वयेन नलिने रुचिरे वहंती
पद्मापि साभयवरा भवसि त्वमेव || 13 ||

अष्टाभिरुग्रविविधायुधवाहिनीभि-
-र्दोर्वल्लरीभिरधिरुह्य मृगाधिराजं |
दूर्वादलद्युतिरमार्त्यविपक्षपक्षान्
न्यक्कुर्वती त्वमसि देवि भवानि दुर्गा || 14 ||

आविर्निदाघजलशीकरशोभिवक्त्रां
गुंजाफलेन परिकल्पितहारयष्टिं |
पीतांशुकामसितकांतिमनंगतंद्रा-
-माद्यां पुळिंदतरुणीमसकृत्स्मरामि || 15 ||

हंसैर्गतिक्वणितनूपुरदूरदृष्टे
मूर्तैरिवार्थवचनैरनुगम्यमानौ |
पद्माविवोर्ध्वमुखरूढसुजातनालौ
श्रीकंठपत्नि शिरसा विदधे तवांघ्री || 16 ||

द्वाभ्यां समीक्षितुमतृप्तिमतेव दृग्भ्या-
-मुत्पाट्य भालनयनं वृषकेतनेन |
सांद्रानुरागतरलेन निरीक्ष्यमाणे
जंघे शुभे अपि भवानि तवानतोऽस्मि || 17 ||

ऊरू स्मरामि जितहस्तिकरावलेपौ
स्थौल्येन मार्दवतया परिभूतरंभौ |
श्रेणीभरस्य सहनौ परिकल्प्य दत्तौ
स्तंभाविवांगवयसा तव मध्यमेन || 18 ||

श्रोण्यौ स्तनौ च युगपत्प्रथयिष्यतोच्चै-
-र्बाल्यात्परेण वयसा परिहृष्टसारौ |
रोमावळीविलसितेन विभाव्य मूर्तिं
मध्यं तव स्फुरतु मे हृदयस्य मध्ये || 19 ||

सख्यः स्मरस्य हरनेत्रहुताशशांत्यै
लावण्यवारिभरितं नवयौवनेन |
आपाद्य दत्तमिव पल्लवमप्रविष्टं
नाभिं कदापि तव देवि न विस्मरेयं || 20 ||

ईशेऽपि गेहपिशुनं भसितं दधाने
काश्मीरकर्दममनुस्तनपंकजे ते |
स्नातोत्थितस्य करिणः क्षणलक्ष्यफेनौ
सिंदूरितौ स्मरयतः समदस्य कुंभौ || 21 ||

कंठातिरिक्तगलदुज्ज्वलकांतिधारा-
-शोभौ भुजौ निजरिपोर्मकरध्वजेन |
कंठग्रहाय रचितौ किल दीर्घपाशौ
मातर्मम स्मृतिपथं न विलंघयेतां || 22 ||

नात्यायतं रचितकंबुविलासचौर्यं
भूषाभरेण विविधेन विराजमानं |
कंठं मनोहरगुणं गिरिराजकन्ये
संचिंत्य तृप्तिमुपयामि कदापि नाहं || 23 ||

अत्यायताक्षमभिजातललाटपट्टं
मंदस्मितेन दरफुल्लकपोलरेखं |
बिंबाधरं वदनमुन्नतदीर्घनासं
यस्ते स्मरत्यसकृदंब स एव जातः || 24 ||

आविस्तुषारकरलेखमनल्पगंध-
-पुष्पोपरिभ्रमदलिव्रजनिर्विशेषं |
यश्चेतसा कलयते तव केशपाशं
तस्य स्वयं गलति देवि पुराणपाशः || 25 ||

श्रुतिसुचरितपाकं श्रीमता स्तोत्रमेत-
-त्पठति य इह मर्त्यो नित्यमार्द्रांतरात्मा |
स भवति पदमुच्चैः संपदां पादनम्र-
-क्षितिपमुकुटलक्ष्मीलक्षणानां चिराय || 26 ||

इति श्रीरुद्रयामले तंत्रे श्रीभुवनेश्वरी स्तोत्रं ||